WWW.GRADESETTER.COM

Subject

Date

# परियोजना

# कार्य

# व

# सांख्यिकी

Teacher's Signature :..........................................

WWW.GRADESETTER.COM

WWW.GRADESETTER.COM



Apple

सेब

WWW.GRADESETTER.COM

WWW.GRADESETTER.COM

Subject........................................ Page No. Date

# वृक्षाणाम् उपयोगिता

तरुः उन्नतः पादपः अस्ति। तरुणाम् स्कन्धम् काष्ठाण्डमस्ति।
अनेके तरवः फलानि ददति। अनेकवृक्षाणाम् समूहः अरण्यम् इति कथ्यते।
तरुणाम् पत्राणि $CO_2$ जलम् च उपयुज्य $O_2$ शर्करां च रचयन्ति। तरवः जनेभ्यः छायां यच्छन्ति।
उक्तम् च "छायामन्यस्य कुर्वन्ति तिष्ठन्ति स्वयमातपे। फलान्यपि परार्थाय वृक्षाः सत्पुरुषाः इव॥"


## आयुर्वेदस्य अनुसारम् वृक्षाणाम् प्रयोजनानि

अस्य निम्बवृक्षस्य रसः तिक्तः। अस्य निम्बवृक्षस्य त्वक्, निर्यासः, पर्णं, पुष्पं, पल्लवं, बीजं, फलं, बीजस्य तैलं, पिण्याकः, रसः च औषधत्वेन उपयुज्यते।
उष्णजले अस्य निम्बवृक्षस्य पर्णानि निमज्ज्य तेन जलेन स्नानं क्रियते चेत् कण्डूयनं पिटकाः च अपगच्छन्ति।
विशिष्टेषु केषुचित् पिटकेषु अस्य पर्णानि सम्पेष्य रसं निष्पीड्य लेप्यते।
निम्बस्य सेवनेन विषबाधा निवारिता भवति।
यद्यपि निम्बः अत्यन्तं तिक्तः तथापि सः सञ्जीवनी इव। पुस्तकानां मध्ये अपि अस्य पर्णानि स्थाप्यन्ते तेन पुस्तकानि कीटैः न खाद्यन्ते।
अस्य पर्णानां शलाकाः दन्तधावनार्थं दन्तकूर्चाणां स्थाने उपयुज्यन्ते।
मशकाणां निवारणाय अस्य काष्ठैः, पर्णैः वा धूमः उत्पाद्यते।
अस्य निम्बस्य फलानि क्वथयित्वा उद्धृत्य वा निष्कासितं तैलम् औषधत्वेन उपयुज्यन्ते।
अस्य फलानि कीटनाशकानि अपि।
अस्य मूलस्य चूर्णम् उष्णजलेन सह 1-2 चमसमितं प्रातः रिक्तोदरे सेवन्ते चेत् शरीरे बलं वर्धते।
व्रणेषु यथा पूयं न भवेत् तथा अस्य तैलं, कल्कं वा उपयुज्यते।

Teacher's Signature :..............................................

WWW.GRADESETTER.COM

WWW.GRADESETTER.COM



WWW.GRADESETTER.COM

Subject........................ Page No. Date

मक्षिकाणां निवारणार्थम्, चर्मरोगेषु च अपि अस्य तैलम् उपयुज्यते।
2. अस्य मूलस्य रसः ज्वरे प्रतिबन्धकत्वेन उपयुज्यते।
3. अनेन फेनकं, दन्तफेनः, दीपतैलं चापि निर्मीयते।
4. कौशेयस्य वर्णपूरणार्थम् अस्य निर्यासः उपयुज्यते।
5. अस्य वल्कलेन रज्जुः निर्मीयते।

अस्य अश्वत्थ वृक्षस्य रसः कषायः। अयं गुरुगुणयुक्तः, रूक्षः, वीर्यशीतः च। अयम् अश्वत्थः आकारस्य कारणात् वृक्षजातौ अन्तर्भवति तथैव औषधीयत्वस्य कारणात् औषधीयानां सस्यानां गणे अपि अन्तर्भवति।

1. अस्य अश्वत्थस्य फलानां खादनेन मलबद्धता निवार्यते। जीर्णक्रिया वर्धते चापि।
2. अस्य त्वचः चूर्णं व्रणस्य उपरि लेपयति चेत् "बसरि" इत्यस्य वृक्षस्य चूर्णम्, औदुम्बरवृक्षस्य चूर्णं "हूवरि" इत्यस्य वृक्षस्य चूर्णं च योजयित्वा जले योजयित्वा सम्यक् क्वथनीयम्। जलं पादभागं यावत् भवेत् तावत् पर्यन्तम् अपि क्वथनीयम्। इदं कषायं "पञ्चवल्कल-कषायम्" इति उच्यते। इदं कषायं मुखे संस्थाप्य गण्डूषकरणेन मुखस्य पिटकाः अपगच्छन्ति। महिलानां श्वेतस्रावः अस्ति चेत् गर्भाशयस्य प्रक्षालनार्थम् अपि इदं कषायम् उपयोक्तुं शक्यते।

कल्पवृक्षः भारतीयभाषासु कथ्यमानः अयं वृक्षः बहुवर्षीयं सस्यम् अस्ति। नारिकेलः कल्पवृक्षः इति अस्य नामान्तरम्। अस्य सर्वेऽपि अङ्गानि उपयोगाय भवन्ति इति अपि च अयं वृक्षः बहुकालं स्वपालकाय आहारं ददाति। नारिकेर वृक्षे शाखाः न भवन्ति, एषु पत्रावली दीर्घा भवति। दीर्घे दण्डे लघूनि पत्राणि समान्तरेण संलग्नानि भवन्ति। अयं वृक्षः समुद्रतीरेषु अथवा लावण्यक्षेत्रेषु सम्यक् प्ररोहति। अस्य फलं भारतीयानां पवित्रतमं भवति। सर्वेषु धार्मिक विधिषु पूर्णफलरूपेण एतत् एव उपयोजयन्ति। नारिकेलवृक्षः भारते अधिकतया संरोहति।

शतायुर्वज्रदेहाय सर्वसम्पत्कराय च।
सर्वारिष्टविनाशाय निम्बकं दलभक्षणम्॥

अयं श्लोकः निम्ब धार्मिकं स्वास्थ्यं च गुरुत्वं सूचयति। अयं निम्बवृक्षः

Teacher's Signature :..............................

WWW.GRADESETTER.COM

WWW.GRADESETTER.COM

WWW.GRADESETTER.COM



# Long Pepper (Peepal)

पीपल

WWW.GRADESETTER.COM

WWW.GRADESETTER.COM

Subject.................................... Page No. Date

भारते वर्धमानः कश्चन वृक्ष विशेषः। अयं भारतस्य सर्वेषु अपि प्रदेशेषु वर्धते। अयं बहूपयोगी वृक्षः इत्येव प्रसिद्धः अस्ति। युगादि पर्वणः अवसरे निम्बुडस्य सेवनं परम्परानुगुणं प्रवर्तते भारते। अयं वृक्षः समतलभूमौ वर्धते। यत्र अधिका वृष्टिः जायते तत्र अयं वृक्षः न वर्धते। कासाराणां, तडागानां, सरोवराणां वा तीरे समृद्धरूपेण वर्धते अयं निम्बवृक्षः। अस्य वृक्षस्य सर्वाङ्गानि अपि औषधत्वेन उपयुज्यन्ते। अस्य पर्णानि संयुक्तगात्राणि। अयं वृक्षः सदा हरिद्वर्णीयः। अस्य पर्णानाम् अञ्चलः क्रकचः इव तीक्ष्णः भवति। अस्य निम्बवृक्षस्य त्वक् कपिलवर्णीयं भवति। पर्णानां कक्षे पुष्पाणां गुच्छं भवति पुष्पाणि मधुगन्धयुक्तानि, श्वेतवर्णीयानि च भवन्ति। मार्चमासतः मेमासाभ्यन्तरे पुष्पाणि जायन्ते। सेप्टेम्बर्-तः नवेम्बर् मासाभ्यन्तरे फलानि वर्धन्ते। फलानि मन्दपीतवर्णीयानि। अस्मिन् एव अवधौ बीजानां सङ्ग्रहणम् अपि प्रचलति। अश्वत्थवृक्षः भारतीयानां सर्वेषां पवित्रतमः वृक्षः इति परिगणितः। एशियाखण्डस्य दक्षिणभागे अयं वृक्षः अधिकतया रोहन्ति। बोधिवृक्षः इति अस्य अपरं नाम। अस्य वृक्षस्य अधः एव तपः कृत्वा सिद्धार्थः बुद्धः अभवत् इति प्रतीतिः अस्ति। कर्णाटकभाषायां अरळि इत्यपि कथयन्ति। अयम् अश्वत्थः भारते सर्वत्र वर्धमानः कश्चन वृक्ष विशेषः। पुराणकालतः अपि अयम् अश्वत्थः देवानां निवासस्थानम् इति ख्यातः अस्ति। अतः एव अयं वृक्षः सर्वत्र पूज्यभावनया पूज्यते। अयम् अश्वत्थः औषधीयसस्यत्वेन अपि परिगण्यते। अस्य वृक्षस्य त्वक्, फलं, पर्णं चापि औषधत्वेन उपयुज्यते। अस्य त्वचि "टैनिन" अंशः अस्ति। मोरासियै कुले विद्यमानस्य अस्य सस्यस्य फैकस् रिलिजियोस इति अस्य शास्त्रीयं नाम। अयं वृक्षः बृहद्रूपेण प्ररोहति बहूपर्णानि च भवन्ति अल्पभारयुक्तानि पर्णानि वायुसञ्चारेण कम्पितानि विशिष्टं नादं जनयन्ति। अस्य वृक्षस्य शाखानां सपत्रः परभागः समिद्रूपेण यज्ञयागादिषु उपयुज्यते। अस्य मूलस्य त्वक् आयुर्वेदीयौषधनिर्माणे उपयुज्यते अयं श्लोकः वृक्षस्य गरिमां सूचयति। प्रत्येक प्राणी श्वसन क्रियायां आक्सीजनवायुं गृह्णाति। कार्बन डाइ-ऑक्साइड वायुं बहिः विसृजति। वृक्षाः पर्यावरणं संतुलितं कुर्वन्ति

Teacher's Signature :....................................

WWW.GRADESETTER.COM

WWW.GRADESETTER.COM



Banyan

बरगद

WWW.GRADESETTER.COM

WWW.GRADESETTER.COM

Page No.

Date

Subject........................................

स्वस्थं पर्यावरणं अस्माकं जीवनस्य आधारोऽस्ति। पर्यावरणस्य च आधाराः पुष्पिताः फुल्लविताः वृक्षाः भवन्ति। वृक्षाः ऑक्सीजनं प्रदाय पर्यावरणं स्वस्थं कुर्वन्ति। ते मानवैः परित्यक्तान् वातावरणे च प्रसृतान् अन्यान् प्रदूषितान् वायून् उदरस्थान् कुर्वन्ति। प्रत्येकप्राणी श्वसनक्रियायां आक्सीजनवायुं गृह्णाति। कार्बन डाइ-ऑक्साइड वायुं बहिः विसृजति। वृक्षाः च कार्बन डाई ऑक्साइड वायुं गृह्णन्ति: आक्सीजनं च विसृजन्ति। अनेन पर्यावरणं स्वस्थं भवति। वृक्षाः पर्यावरणं संतुलितं कुर्वन्ति। ते यथाकालम् मेघानाम् वर्षणे सहायकाः भवन्ति। वृक्षाः भूमेः जलं गृह्णन्ति। अस्य जलस्य किंचित भागं ते उपभुञ्जन्ति। अवशिष्टं जलं वाष्परूपेण पत्राणां रन्ध्रेभ्यः बहिः निर्गच्छति। इदं वाष्पितं जलं मेघानाम् निर्माणे सहायकं भवति तथा च वृक्षाः वर्षायाः जलं मूलैः अवशोषयन्ति। भूमौ पतितानि तेषाम् पत्राणि पुष्पाणि च अतिरिक्तं जलं तेन च सह मृदां व्यर्थं वहनात् अवरुन्धन्ति। इत्थम् ते भूमये पर्याप्तं जलं प्रदाय तस्याः उर्वराशक्तिं वर्धयन्ति।

वृक्षाः पुष्पाणाम् फलानाम् औषधीनाम् च आगाराः सन्ति। वृक्षेभ्यः काष्ठं प्राप्यते, यत् न केवलम् ईंधनरूपे अपितु भवनानाम् साज-सज्जायामपि प्रयुज्यते। वृक्षपादपानाम् हरीतिमा, तेषां पुष्पाणाम् शोभा, पक्षिणाम् कलरवः च शुष्कहृदयानपि रसविभोरान् कुर्वन्ति।

छिन्नोऽपि रोहति तरुः,
क्षीणोऽप्युपचीयते पुनश्चन्द्रः।
इति विमृशन्तः सन्तः,
सन्तप्यन्ते न ते विपदा॥

परोपकारस्य सन्देशः अपि वृक्षैः प्राप्यते।
नादन्तिशस्यं खलु वारिवाहाः, परोपकाराय सतां विभूतयः॥

Teacher's Signature :..........................................

WWW.GRADESETTER.COM